**ಕರ್ನಾಟಕ ಪ್ರೌಢಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ**
ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು–560003.

**KARNATAKA SECONDARY EDUCATION EXAMINATION BOARD**
Malleshwaram, Bengaluru – 560003.

**2020-21 ಸಾಲಿನ ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ –1**
**2020-21 MODEL QUESTION PAPER - 1**

**ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ – ಸಂಸ್ಕೃತ** | **ವಿಷಯ ಸಂಕೇತ : 67-S**
**Subject : THIRD LANGUAGE SANSKRIT** | **Subject Code : 67-S**
**ಅವಧಿ : 3 ಗಂಟೆ** | **ಗರಿಷ್ಠ ಅಂಕಗಳು : 80**
**Time : 3 hrs.** | **Max. Marks : 80**

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**
**Regular Fresh**

---

## परीक्षार्थिनां सामान्यसूचना:

1) अस्मिन् प्रश्नपत्रे अष्ठत्रिंशत् (38) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति।

2) इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति। परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत। प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति पर्यालोचयत।

3) वस्तुनिष्ठनां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया:।

4) प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति।

5) प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति। पञ्चदशनिमेषा: प्रश्न पत्रस्य पठनार्थं निर्धारिता: सन्ति।

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत।** 8 x 1 = 8

1. 'पवित्रम्' – अस्य समानार्थकं पदम् इदं भवति।

   A. शुद्धम्

   B. बद्धम्

   C. सिद्धम्

   D. युद्धम्

2. 'नूतनम्' – इत्यस्य विरुद्धार्थकं पदम् इदं भवति।

   A. नवीनम्

   B. पुरातनम्

   C. यौवनम्

   D. पावनम्

3. 'एकाग्रतायाः' – अत्र एषा विभक्तिः अस्ति।

   A. तृतीयाविभक्तिः

   B. चतुर्थीविभक्तिः

   C. षष्ठीविभक्तिः

   D. सप्तमीविभक्तिः

4. 'शुष्यति' – अत्र एषः लकारः अस्ति।

   A. लुट्लकारः

   B. लृट्लकारः

   C. लोट्लकारः

   D. लङ्लकारः

5. 'करोमि' – इत्यत्र एषः पुरुषः अस्ति।

   A. प्रथमपुरुषः

   B. मध्यमपुरुषः

   C. उत्तमपुरुषः

   D. अन्यपुरुषः

6. 'इच्छन्' – इत्यत्र एषः प्रत्ययः भवति –

   A. शानच् प्रत्ययः

   B. क्तवत् प्रत्ययः

   C. क्तप्रत्ययः

   D. शतृप्रत्ययः

7. 'चन्द्रशेखरः' – एषः समासः भवति।

   A. तत्पुरुषसमासः

   B. द्वन्द्वसमासः

   C. अव्ययीभावसमासः

   D. बहुव्रीहिसमासः

8. नगरे शोभमानं मन्दिरं वर्तते। अत्र कृदन्तपदम् इदं भवति।

   A. नगरे

   B. शोभमानम्

   C. मन्दिरम्

   D. वर्तते

**II. चतुर्थपदं लिखत।** **4 x 1 = 4**

9. पार्थस्थ सारथिः – कृष्णः : : कर्णस्य सारथिः – ......................

10. संस्कृतसाहित्योत्सवः – उज्जयिनीनगरे : : विश्वसंस्कृतपुस्तकमेला – ...................

11. ढुण्ढिराजः – गणेशः : : दक्षिणामूर्तिः – ...................

12. पञ्चरात्रम् – भासः : : महाभारतम् – ...................

**III. एकवाक्येन उत्तरं लिखत।** **4 x 1 = 4**

13. देवासुरैरपि न भेद्यं किम्?

14. पठनार्थं का आवश्यकी?

15. केषां मैत्री छायेव भवति ?

16. त्रयः योगाः के ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत –** **4 x 2 = 8**

17. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

18. ग्रन्थालयस्य ग्रन्थपालः किम् अचिन्तयत् ?

19. शारदा कीदृशी ?

20. किं किं शाश्वतं तिष्ठति ?

अथवा

विप्ररूपेण कः प्रविशति ? देवासुरैरपि न भेद्यं किम् ?

**V. संस्कृतभाषया अनुवादं कुरुत –** **1 x 2 = 2**

21. ಇಂದು ರವಿವಾರ, ಶಾಲೆಗೆ ವಿರಾಮವಿದೆ. ನಾಳೆ ಸೋಮವಾರ, ನಾವು ಶಾಲೆಗೆ ಹೋಗುವೆವು.

Today is Sunday, it is a holiday. Tomorrow is Monday, we go to school.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** **1 x 2 = 2**

22. पुरा भोजभूपालस्य सभायाम् अनेके कवयः आसन्। तेषामेकः कालिदासः नाम।

**VII. विग्रहवाक्यं लिखत।** **1 x 2 = 2**

23. i. पद्मनाभः।

ii. प्रतिक्षणम्।

अथवा

**समस्तपदं लिखत।**

i. रूपस्य योग्यम् =

ii. महत् बलं यस्य सः =

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत।** **1 x 2 = 2**

24. ''मुखारविन्दे विनिवेशयन्तम्।''

**IX. यथा निर्देशम् उत्तरं लिखत।** **2 x 3 = 6**

25. ''गच्छ, अद्य अहं पुस्तकं न दास्यामि।''

क: पाठ:? क: अवदत्? कम् अवदत्?

26. 'सागर इव तिष्ठतु ते यश:'

क: पाठ:? क: अवदत्? कम् अवदत्?

**X. सन्धिं विभज्य नाम लिखत।** **1 x 3 = 3**

27. a. ग्रामोत्सव:

b. नन्दनो हसति

c. कश्चिदपि

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत।** **1 x 3 = 3**

28. ''लघ्वी पुरा वृद्धिमती च पश्चात्।''

**XII. कवे: देश-काल-कृतीनां विषये चतुरै: वाक्यै: उत्तरं लिखत।** **1 x 3 = 3**

29. डा. बा. श्री. रामकृष्णराव्

अथवा

वेदव्यास:

**XIII. पद्यभागस्य नाम विलिख्य तात्पर्यं पञ्चषै: वाक्यै: कर्नाटकभाषया, संस्कृतभाषया, आङ्गलभाषया वा लिखत।** **3 x 3 = 9**

30. कर्मण्ये वाधिकारस्ते मा फलेषु कदाचन।
मा कर्म फलहेतुर्भू: मा ते सङ्गोऽस्त्वकर्मणि।।

31. मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून् पर्वतीकृत्य नित्यम्
निजहृदि विलसन्तः सन्ति सन्तः कियन्तः।।

32. भारतवासिषु बाह्ये भेदे
बहुत्र बहुधा दृष्टेऽपि।
आन्तरङ्गिकी संस्कृतिरेका
सनातनी नो बध्नाति।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत।** **1 x 3 = 3**

33. चिन्तामणिः ...................................................।

......................................................महाबलः।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्गलभाषया, संस्कृतभाषया वा लिखत।** **2 x 4 = 8**

34. संस्कृतग्रामस्य वैशिष्ट्यं वर्णयत।

35. 'उभयभारती' भारतस्य आदर्शनारी इति विषयं सङ्गृह्य लिखत।

अथवा

" विक्रमः वेतालश्च" इति कथायाः सारांशं सङ्गृह्य लिखत।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।** **1 x 4 = 4**

36. भारतम् अस्माकं देशः। अस्य देशस्य उत्तरभागे हिमालयो नाम पर्वतराजः शोभते। भारतस्य शिरोस्थानभूते हिमालयपर्वते अनेकानि पुण्यक्षेत्राणि सुशोभन्ते। हिमालयस्य शिखराणि अतीव उन्नतानि भवन्ति हिमावृतानि च। अत एव अयं लोके हिमालय इति सदा प्रख्यातः। अत्र केदार बदर्यादीनि पुण्यक्षेत्राणि सन्ति। गङ्गा, यमुना, ब्रह्मपुत्राद्याः नद्यः अस्मात् उद्गम्य भारते प्रवहन्ति। अनेके यतयः हिमालयस्य आश्रमेषु तपस्यन्ति। हिमालयस्य अगाधतां कविः कालिदासः "पृथिव्याः मानदण्डः" इति शब्देन वर्णितवान्। अस्य हिमालयस्य अत्युन्नतप्रदेशे टिबेट् देशस्य पश्चिमभागे मानससरोवरः अस्ति। तत्रैव कैलास पर्वतः अपि सुशोभते। कैलासपर्वतः शिवपार्वत्योः आवासस्थानम् इति भारतीयाः मन्यन्ते। अस्य प्रदेशस्य दर्शनं पुण्यदायकम् इति जनाः भावयन्तिः।

i. कस्य शिखराणि अतीव उन्नतानि भवन्ति ?

ii. अनेके यतयः कुत्र तपस्यन्ति ?

iii. हिमालयस्य अगाधतां कः "पृथिव्याः मानदण्डः" इति शब्देन वर्णितवान् ?

iv. कैलासपर्वतः कयोः आवासस्थानम् इति भारतीयाः मन्यन्ते ?

**XVII. दशवाक्यैः प्रबन्धं लिखत।** **1 x 4 = 4**

37. "संस्कृतभाषायाः गरिमा"

अथवा

"परिसरसंरक्षणम्"

**XVIII. पत्रं लिखत।** **1 x 5 = 5**

38. बेलगाविमण्डलस्य सर्वकारीय-विद्यालयस्य छात्रः / छात्रा इति मत्वा अग्रजस्य विवाहार्थं दिनचतुष्टयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।

अथवा

शैक्षणिकप्रवासार्थं कन्याकुमारीं गन्तुम् द्विसहस्ररूप्यकाणि प्रेषयितुं सम्प्रार्थ्य पितरं प्रति पत्रं लिखत।